# Shri Vrajanavinayuvadvandvashtakam

# શ્રીવ્રજનવીનયુવદ્વન્દ્વાષ્ટકમ્

## Document Information

Text title : vrajanavInayuvadvandvAShTakam

File name : vrajanavInayuvadvandvAShTakam.itx

Category : vishhnu, krishna, rUpagosvAmin, stavamAlA, aShTaka, vishnu

Location : doc_vishhnu

Author : Rupagoswami

Transliterated by : Jan Brzezinski (Jagadananda Das) jankbrz at yahoo.com and Neal Delmonico (Nitai Das) ndelmonico at sbcglobal.net

Description/comments : From stavamAlA (rUpagosvAmivirachitA) Garland of Devotional Prayers stavamAlA

Acknowledge-Permission: http://granthamandira.net Gaudiya Grantha Mandira

Latest update : February 22, 2019

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્રીવ્રજનવીનયુવદ્વન્દ્વાષ્ટકમ્

શ્રીરાધાકૃષ્ણૌ જયતઃ ।

અદુર્વિધવિદગ્ધતાસ્પદવિમુગ્ધવેશશ્રિયો-
    રમન્દશિખિકન્ધરાકનકનિન્દિવાસસ્ત્વિષોઃ ।
સ્ફુરત્પુરટકેતકીકુસુમવિભ્રમાભ્રપ્રભા
    નિભાઙ્ગમહસોર્ભજે વ્રજનવીનયૂનોર્યુગમ્ ॥ ૧॥

સમૃદ્ધવિધુમાધુરીવિધુરતાવિધાનોદ્ધુરૈ-
    ર્નવામ્બુરુહરમ્યતામદવિડમ્બનારમ્ભિભિઃ ।
વિલિમ્પદિવ કર્ણકાવલિસહોદરૈર્દિક્તટી
    મુખદ્યુતિભરૈર્ભજે વ્રજનવીનયૂનોર્યુગમ્ ॥ ૨॥

વિલાસકલહોદ્ધતિસ્ખલદમન્દસિન્દૂરભા-
    ગખર્વમદનાઙ્કુશપ્રકરવિભ્રમૈરઙ્કિતમ્ ।
મદોદ્ધુરમિવોભયોર્મિથુનમુલ્લસદ્વલ્લરી
    ગૃહોત્સવરતં ભજે વ્રજનવીનયૂનોર્યુગમ્ ॥ ૩॥

ધનપ્રણયનિર્ઝરપ્રસરલબ્ધપૂર્તેર્મનો
    હ્રદસ્ય પરિવાહિતામનુસરદ્ભિરસ્રૈઃ પ્લુતમ્ ।
સ્ફુરત્તનુરુહાઙ્કુરૈર્નવકદમ્બજૃમ્ભશ્રિયં
    વ્રજત્તદનિશં ભજે વ્રજનવીનયૂનોર્યુગમ્ ॥ ૪॥

અનઙ્ગરણવિભ્રમે કિમપિ વિભ્રદાચાર્યકં
    મિથશ્ચલદૃગઞ્ચલદ્યુતિશલાકયા કીલિતમ્ ।
જગત્યતુલધર્મભિર્મધુરનર્મભિસ્તન્વતો-
    ર્મિથો વિજયિતાં ભજે વ્રજનવીનયૂનોર્યુગમ્ ॥ ૫॥

અદૃષ્ટચરચાતુરીચલચરિત્રચિત્રાયિતૈઃ
    સહ પ્રણયિભિર્જનૈર્વિહરમાનયોઃ કાનને ।
પરસ્પરમનોમૃગં શ્રવણચારુણા ચર્ચરી

ચયેન રજયદ્ ભજે વ્રજનવીનયૂનોર્યુગમ્ ॥ ૬॥

મરન્દભરમન્દિરપ્રતિનવારવિન્દાવલિ
સુગન્ધિનિ વિહારયોર્જલવિહારવિસ્ફૂર્જિતૈઃ ।
તપે સરસિ વલ્લભે સલિલવાદ્યવિદ્યાવિધૌ
વિદગ્ધભુજયોર્ભજે વ્રજનવીનયૂનોર્યુગમ્ ॥ ૭॥

મૃષાવિજયકાશિભિઃ પ્રથિતચ્તુરીરાશીભિ-
ર્ગ્લહસ્ય હરણં હઠાત્ પ્રકટયદ્ભિરુચ્ચૈર્ગિરા ।
તદક્ષકલિદક્ષયોઃ કલિતપક્ષયોઃ સાક્ષિભિઃ
કુલૈઃ સ્વસુહૃદાં ભજે વ્રજનવીનયૂનોર્યુગમ્ ॥ ૮॥

ઇદં વલિતતુષ્ટયઃ પરિપઠન્તિ પદ્યાષ્ટકં
દ્વયોર્ગુણવિકાશિ યે વ્રજનવીનયૂનોર્જનાઃ ।
મુહુર્નવનવોદયાં પ્રણયમાધુરીમેતયો-
રવાપ્ય નિવસન્તિ તે પદસરોજયુગ્માન્તિકે ॥ ૯॥

ઇતિ શ્રીરૂપગોસ્વામિવિરચિતસ્તવમાલાયાં
શ્રીવ્રજનવીનયુવદ્વન્દ્વાષ્ટકં સમ્પૂર્ણમ્ ।

---

*Shri Vrajanavinayuvadvandvashtakam*
pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*